श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीभीमसेनविरचितम्

# ॥ श्री यन्त्रोद्धारकमङ्गलाष्टकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री यन्त्रोद्धारकमङ्गलाष्टकम् ॥

यन्त्रोद्धारकनामको रघुपतेराज्ञां गृहीत्वाऽर्णवं
तीर्त्वाऽशोकवने स्थितां स्वजननीं सीतां निशाम्याशुगः।
कृत्वा संविदमङ्गुलीयकमिदं दत्वा शिरोभूषणं
सङ्गृह्यार्णवमुत्पपात हनुमान् कुर्यात् सदा मङ्गलम् ॥ 1 ॥

प्राप्तस्तं सदुदारकीर्तिरनिलः श्रीरामपादाम्बुजं
नत्वा कीशपतिर्जगाद पुरतः संस्थाप्य चूडामणिम्।
विज्ञाप्यार्णवलङ्घनादिशुभकृन्नानाविधं भूतिदं
यन्त्रोद्धारकनाममारुतिरयं कुर्यात् सदा मङ्गलम् ॥ 2 ॥

धर्माधर्मविचक्षणः सुरतरुर्भक्तेष्टसन्दोहने
दुष्टारातिकरीन्द्रकुम्भदलने पञ्चाननः पाण्डुजः।
द्रौपद्यै प्रददौ कुबेरवनजं सौगन्धिपुष्पं मुदा
यन्त्रोद्धारकनाममारुतिरयं कुर्यात् सदा मङ्गलम् ॥ 3 ॥

यः किर्मीरहिडिम्बकीचकबकान् प्रख्यातरक्षोजनान्
संहृत्य प्रययौ सुयोधनमहन् दुःशासनादीन् रणे।
भित्वा तद्धृदयं स घोरगदया सन्मङ्गलं दत्तवान्
यन्त्रोद्धारकनाममारुतिरयं कुर्यात् सदा मङ्गलम् ॥ 4 ॥

यो भूमौ महदाज्ञया निजपतेर्जातो जगज्जीवने
वेदव्यासपदाम्बुजैकनिरतः श्रीमध्यगेहालये।
सम्प्राप्ते समये त्वभूत् स च गुरुः कर्मन्दिचूडामणिः
यन्त्रोद्धारकनाममारुतिरयं कुर्यात् सदा मङ्गलम् ॥ 5 ॥

मिथ्यावादकुभाष्यखण्डनपटुर्मध्वाभिधो मारुतिः
    सद्भाष्यामृतमादरान्मुनिगणैः पेपीयमानं मुदा।
स्पृष्ट्वा यः सततं सुरोत्तमगणान् सम्पात्ययं सर्वदा
    यन्त्रोद्धारकनाममारुतिरयं कुर्यात् सदा मङ्गलम्॥ **6** ॥

पाकार्कार्कसमानसान्द्रपरमासाकीर्ककाकारिभिः
    विद्यासार्कजवानरेरितरुणा पीतार्कचक्रः पुरा।
कङ्कार्कानुचरार्कतप्तजरया तप्ताङ्कजातान्वितो
    यन्त्रोद्धारकनाममारुतिरयं कुर्यात् सदा मङ्गलम्॥ **7** ॥

श्रीमद्व्यासमुनीन्द्रवन्द्यचरणः श्रेष्ठार्थसम्पूरणः
    सर्वाघौघनिवारणः प्रविलसन्मुद्रादिसम्भूषणः।
सुग्रीवादिकपीन्द्रमुख्यशरणः कल्याणपूर्णः सदा
    यन्त्रोद्धारकनाममारुतिरयं कुर्यात् सदा मङ्गलम्॥ **8** ॥

यन्त्रोद्धारकमङ्गलाष्टकमिदं सर्वेष्टसन्दायकं
    दुस्तापत्रयवारकं द्विजगणैः सङ्गृह्यमाणं मुदा।
भक्ताग्रेसरभीमसेनरचितं भक्त्या सदा यः पठेत्
    श्रीमद्वायुसुतप्रसादमतुलं प्राप्नोत्यसौ मानवः॥ **9** ॥

॥ श्री यन्त्रोद्धारकमङ्गलाष्टकं समाप्तम्॥